श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कमलाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कमलाष्टकम् ॥

न्यङ्कावरातिभयशङ्काकुले धृतदृगङ्कायतिः प्रणमतां
    शङ्काकलङ्कयुतपङ्कायताश्मशितटङ्कायितस्वचरिता।
त्वं कालदेशपदशङ्कातिपातिपतिसङ्काशवैभवयुता
    शं काममातरनिशं कामनीयमिहसङ्काशयाशु कृपया ॥ 1 ॥

आचान्तरङ्गदलिमोचान्तरङ्गरुचिवाचां तरङ्गगतिभिः
    काचाटनाय कटुवाचाटभावयुतनीचाटनं न कलये।
वाचामगोचरसदाचारसूरिजनताचातुरीविवृतये
    प्राचां गतिं कुशलवाचां जगज्जननियाचामि देवि भवतीम् ॥ 2 ॥

चेटीकृतामरवधूटीकराग्रधृतपेटीपुटार्घ्यसुमनो -
    वीटीदलक्रमुकपाटीरपङ्कनवशाटीकृताङ्गरचना।
खेटीकमानशतकोटीकराब्जजजटाटीरवन्दितपदा
    या टीकतेऽब्जवनमाटीकतां हृदयवाटीमतीव कमला ॥ 3 ॥

स्वान्तान्तरालकृतकान्तागमान्तशतशान्तान्तराघनिकराः
    शान्तार्थकान्तवकृतान्ता भजन्ति हृदिदान्ता दुरन्ततपसा।
यां तानतापभवतान्तातिभीतजगतां तापनोदनपटुं
    मां तारयत्वशुभकान्तारतोऽद्य हरिकान्ताकटाक्षलहरी ॥ 4 ॥

यां भावुका मनसि संभावयन्ति भवसंभावनापहृतये
    त्वं भासि लक्ष्मि सततं भाव्ययद्भवनसंभावनादिविधये।
जम्भारिसंपदुपलम्भादिकारणमहं भाव्यमङ्घ्रियुगलं
    संभावये श्रुतिषु संभाषितं वचसिसंभाष्य तस्य तव च ॥ 5 ॥

दूरावधूतमधुधारागिरोच्चकुचभारानताङ्गलतिका -
सारागलिप्तघनसारार्द्रकुङ्कुमरसा राजहंसगमना।
वैराकरस्मरविकारापसंसरणवाराशिमग्नमनसः
श्रीराविरस्तु धुरि ताराय मे गुरुभिराराधिता भगवती॥ **6** ॥

श्रीवासधूपकनदावासदीपरुचिरावासभूपरिसरा
श्रीवासदेशलसदावापकाशरदभावाभकेशनिकरा।
श्रीवासुदेवरमणी वामदेवविधिदेवाधिपावनपरा
श्रीवासवस्तुनरदेवादृतस्तुतिसभावा मुदेऽस्तु सुतराम्॥ **7** ॥

भाषादिदेवकुलयोषामणिस्तवनघोषाञ्चितस्वसविधा
दोषाकुले जगति पोषाकुला सपदिशेषाहिशायिदयिता।
दोषालयस्य मम दोषानपोह्य गतदोषाभिनन्द्यमहिमा
शेषाशनाहिरिपुशेषादिसंपदविशेषान् ददातु विभवान्॥ **8** ॥

॥ श्री कमलाष्टकं समाप्तम्॥